**इषुमात्र** न० इषुप्रमाणमस्य इषु+मात्रच्। १शरप्रमाणे ऋग्वेदिनां २कुण्डे कुण्डशब्दे विवृतिः।३इषुप्रमाणमात्रे त्रि० स्त्रियां ङीप्। “यद्येकः पशुः स्यात् एकप्रादेशां कुर्य्यात् अथ यदि पञ्च पशवः स्युः पञ्चप्रादेशां कुर्य्यादिषुमात्रीं वा वीर्य्यं वा इषुर्वीर्य्यसम्मितैव तद्भवति। पञ्चप्रादेशा ह्यस्त्वेव पुरेषुर्भवति” शत०ब्रा० ६,५,२,१०। इदमुखामधिकृत्य प्रवृत्तम्। उखां करोतीत्युपक्रम्य “पञ्चप्रादेशामिषुमात्रीं वा तिर्य्यक् पञ्चपशौ” कात्या० १६,३,२५, उक्तेः। इषुमानं च अङ्गुल्यवधिबाहुमूलपर्य्यन्तमानं तच्च प्रादेशत्रयम् याज्ञिकसम्प्रदायप्रसिद्धम्। ४शरगतिपर्य्यन्तमाने च। “अथ यदब्रवीत् वर्द्धस्वेति। तस्मादु ह स इषुमात्रमेव तिर्य्यक् वर्द्धते इषुमात्रं प्राङ्सोऽवैवावरं समुद्रम् दधावव” शत०ब्रा० १,६,३,११ वृत्रासुरवर्द्धनप्रकारः। “इषुमात्रं धनुषः सकाशात् बलात् प्रयुक्त इषुर्यावद्दूरं गच्छति तावन्मात्रं प्रतिक्षणं तिर्य्यक् उभयपार्श्वतः अवर्द्धत” भा०। शरविक्षेपप्रमाणञ्च। इषुविक्षेपशब्दे दृश्यम्।

**इषुविक्षेप** पु० इषोर्विक्षेपयोग्यदेशः। सार्द्धशतहस्तमिते शरविक्षेपयोग्ये देशे तन्मानमाह स्मा०त० पितामहः “मध्यमेन च चापेन प्रक्षिपेत्तु शरत्रयम्। हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः। तत्प्रमाणदेशातिक्रमेणैव पुरीषोत्सर्गः कार्य्यः। “ततः कल्यं समुत्थाय कुर्य्यात् मैत्रं नरेश्वर! नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः”। मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गं इषुविक्षेपमतीत्य इषुविक्षेपयोग्यदेशाद्बहिः” स्मा०त० रघु०।

**इषेत्वक** पु० इषे त्वा इतिभागोऽस्त्यत्रानुवाके अध्याये वा गोपषा० वुन्। इषेत्वा इतिशब्दयुक्ते अनुवाके अध्याये च। स च यजुर्वेदीयः प्रथमाध्यायः तत्रादौ इषे त्वोर्ज्जेत्वेति शब्दवत्त्वात् तस्य तथात्वम् एवं तदन्तर्गतोऽनुवाकोऽपि तथा।

**इष्कर्त्तृ** त्रि० निस्+कृ—तृच् “निशब्दोबहुलमिति” प्रातिशाख्यसूत्रेणोपसर्गैकदेशनकारलोपः। निष्कर्त्तरि। “इष्कर्त्तारमध्वरस्य प्रचेतसम्” ऋ० १०,१४०,५। इष्कृदादशोऽप्यत्र।

**इष्कृति** स्त्री निष्+कृ—क्तिच् इष्कर्त्तृवत् नलोपः। गर्भान्निष्क्रमकारिण्यां मातरि जनन्याम्। “इष्कृतिर्नाम वो माता वोयूयं स्थ निष्कृतीः” यजु० १२,८३,। “इष्कृतिर्नाम निष्कृतिनाम्नी माता जननी” वेददी०।

**इष्ट** त्रि० इष—कर्मणि क्त। १अभिलषिते, २प्रिये “इष्टोऽसि सखा चेति गीता० च। यज भावे क्त। ३यज्ञादौ न० कर्म्मणि, क्त। ४पूजिते ५एरण्डवृक्षे पु०। ६संस्कारे न०। ‘एकाग्निकर्म्म हवनं त्रेतायां यच्च हूयते। अन्तर्वेद्याञ्च यद्दानमिष्टं तदभिधीतते। अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवञ्च प्राङुरिष्टमिति स्मृतम्” जातूकर्णोक्ते ७धर्म्मकार्य्ये न०। इष्टञ्च इच्छाविषयः तच्च द्विविधं गौणं मुख्यञ्च। तत्र इतरेच्छानधीनेच्छाविषयोमुख्यं तत्साधनं गौणम्। तत्र मुख्यमिष्टं सुखं दुःखाभावश्च। तदिच्छाया इतरेच्छानधीनत्वात्। तत्साधनं पाकभोजनादि गौणं सुखदुःखाभावेच्छयैव तदिच्छायाः समुन्मेषात् अधिकमिच्छाशब्दे ९१३ पृष्ठे उक्तम्। तत्रेच्छाविषये “सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्”। “अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्म चोच्यते”। ‘इष्टं हि वो देवा दास्यन्ते यज्ञभाविताः” इति च गीता। यज्ञे “पुरोडाशभुजामिष्टमिष्टं कर्त्तुमलन्तराम्” माघः इष्टं यागः इष्टमभीष्टं कर्त्तुमलन्तरामित्यर्थः। “इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्” देवलः। इष्टं यजनम्” शु०त०रघु० धृते च ‘यज्ञैरिष्टं क्रतुशतम्” विक्रमो० स्मृतिपरिभाषिते इष्टकर्म्मणि द्विजातीनामेवाधिकारः न स्त्रीशूद्रयोः यथाह ‘इष्टमुक्तं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके” जातूकर्णः ‘वैदिके वेदसाध्ये अग्निहोत्रादाविति” रत्नाकरः। “पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्याम् वृद्धानाथाऽतिथीन् स्त्रियः” वृहस्पतिवचने स्त्रिया पूर्त्तमात्रेऽधिकारविधानात् तत्र ‘जलाशयोत्सर्गरूपपूर्त्ते गोरवतारणानुमन्त्रणयोयजमानकर्तृकमन्त्रपाठ विधानात् तत्र अमन्त्रकतया स्त्रीशूद्रयोरनधिकारेण तद्वति यागेऽपि तयोर्नाधिकारः विशेषोपदेशाभावात्” इति द्वैतनिर्णयानुसारिणः। वृषोत्सर्गे तदङ्गहोम इव ब्राह्मण द्वारा तन्मन्त्रपाठसम्भवात्तयोरपि तत्राधिकारः इति रघुनन्दनादयः। ‘अमन्त्रस्य तु शूद्रस्य विप्रोमन्त्रेण गृह्यते” वराहपु० “तद्भुतमक्षतञ्चाग्नौ न स्त्री जुहुयादनुपेतः” आप० वचनं तु स्वयंहोमविषयम्। “श्रौतस्मार्त्तक्रियाहेतोर्वृणुयादृत्विजः स्वयम्” याज्ञ० श्रौत इव स्मार्त्तेऽपि कर्मणिः ऋत्विग्वरणोक्तेः। अतएव “ऋत्विग्वादे नियुक्तश्च समौ संपरिकीर्त्तितौ। यत्र स्वाध्याय-